“गृहे दास्यां जातो गृहजातः१ क्रीतो मूल्येन२। लब्धः३ प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः४। अनाकालभृतो दुर्भिक्षे योदासत्वाय मरणाद्रक्षितः५। आहितः स्वामिना धनग्रहणेनाधितां नीतः६। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः७। युद्धप्राप्तः समरे विजित्य गृहीतः८। पणेजितः यद्यस्मिन् विवादे पराजितोऽहन्तदा त्वद्दासो भवामीति परिभाष्य जितः९। तवाहमित्युपगतः तवाहन्दास इति स्वयम्प्रतिपन्नः१०। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः११। कृतः एतावत्कालं त्वद्दास इत्यभ्युपगमितः१२। भक्तदासः सर्वकालम्भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः१३। वडवाहृतः वडवा गृहदासी तया हृतस्तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः१४। य आत्मानं विक्रीणीते स आत्मविक्रेता”१५। इत्येवम्पञ्चदश प्रकाराः”।

**कृतधी** त्रि० कृता सम्पादिता धीर्येन। शास्त्राभ्याससंस्कृतान्तःकरणे, स्थिरचित्ते, “कृतधीः किं पभाषेतेति” “कृतधीर्मुनिरुच्यते” गीता। [ व्यासनिपुणे अमरः।

**कृतध्वज** पु० नृपभेदे “कुशध्वजस्तस्य पुत्रस्ततो धर्म्मध्वजो नृपः धर्म्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ” भाग० ९,१०,१३,

**कृतपुङ्ख** पु० कृतः अभ्यस्तः पुङ्खः तद्युक्तोवाणो येन। शरा-

**कृतपूर्व्विन्** त्रि० कृतं पूर्व्वमनेन “सपूर्व्वाच्च” पा० इनि। कृतपूर्व्वकर्म्मके तद्बोधप्रकारः सरलायामस्माभिनिरूपितो यथा “कृतपूर्वी कटं भुक्तपूर्वी ओदनमित्यादिमहाभाष्यकारप्रयोगा दृश्यन्ते तत्र च कृतं पूर्वमनेनेति विग्रहे “सह सुपा” इति पा०समासे पूर्वादिनिरितीनेरनुवृत्तिमता “सपूर्वाच्चेति” पा० सूत्रेण इनिर्विहितः तत्र यदि कृतमिति कर्मणि क्तः स्यात् तदा तस्य कटादिकर्म्मरूपविशेषणतया सापेक्षत्वेन पूर्वादिपदेन समासो न स्यात् एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात् न वृत्तिसम्भवः। भाष्यप्रामाण्याच्च तत्र वृत्तौ सत्यामेषा रीतिराकलनीया तथाहि प्रथमं कर्माविवक्षयाऽकर्मकत्वेन भावे क्तप्रत्यये विहिते तदन्तेन पूर्वस्य “सह सुपेति” पा०समासे कृते तत्पूर्वकात् पूर्वशब्दादिनिप्रत्ययो भवति। पश्चाच्च कर्त्तृकृतक्रियायाः कर्माकाङ्क्षायां कटादिकर्मणोऽन्वयः एतदेव हरिणा दर्शितं यथा “अकर्मकत्वे सत्येव क्तान्ते भावाभिधायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्मणा। अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः। क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति”। गमनकर्तृवाचकगतादिमध्यपातिनी गमनक्रिया कर्त्तृविशेषणत्वेनोपस्थिता यथा अविग्रहा असुबोधा तथा कृतपूर्वकर्त्तृबोधककृतपूर्विमध्यपातिन्यपीति तदर्थः”।

**कृतप्रणाश** पु० कृतयोः पुण्यापुण्ययोर्भोगमन्तरेण प्रणाशो नाशः। कृतहानौ दोषभेदे। स च दोषविशेषः कृतप्रणाशाकृताभ्यागमौ दोषौ जीवस्यानित्यत्वे प्रसक्तौ” शा० सू० भा० दर्शितौ [ स्त्री राजनि०

**कृतफल** न० कृतं फलमस्य। १कक्कोले २कोलशिम्ब्यां टाप्

**कृतब्रह्मन्** त्रि० कृतं ब्रह्म स्तोत्रं येन। कृतस्तोत्रे “वनवद्दनुष्मतः कृतब्रह्मा” ऋ० २,२५,१,

**कृतम्** अव्य० कृत—बा० कमु। अलमर्थे, निषेधे च।

**कृतमाल** पु० कृता मालास्य। १आरग्वधे, (सोन्दाल) २कर्णिकारे च अमरः। ३कर्णिकारवृक्षे ४नदीभेदे स्त्री राजनि०। ५कृतमाल्ये मालाकरे त्रि०।

**कृतमुख** त्रि० कृतं संस्कृतं मुखं यस्य। पण्डिते अमरः

**कृतरथ** पु० १निमिवंश्ये नृपभेदे “मेरोः प्रतीपस्तस्माच्च जातः कृतरथो यतः” भाग० ९,१३,१, स्लो०। २सम्पादितरथे रथकारे त्रि०

**कृतलक्षण** त्रि० कृतानि लक्षणान्यस्य। १गुणैर्विख्याते अमरः। २कृतचिह्ने च “ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः” मनुः।

**कृतवर्म्मन्** पु० कृतवीर्य्यभ्रातरि कनकनृपात्मजे। “कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः। कृतवीर्य्यः कृतौजाश्च कृतवर्म्मा तथैवच। कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्य्यादथार्जुनः” हरिवं २१अ०। यदुवंश्ये २क्षत्रियभेदे “समीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः। स्वयंभोजः, स्वयंभोजाद् हृदिकः संबभूव ह। तस्य पुत्रा बभूवुर्हि सर्व्वे भीमपराक्रमाः। कृतवर्म्माग्रजस्तेषां शतधन्वा तु मध्यमः” हरि०वं०३९अ० “रामे भारं समासज्य युयुधाने च वीर्य्यवान्। अक्रूरे विपृथौ चापि गदे च कृतवर्म्मणि” हरिवं०११२अ० [ त्रिका०

**कृतविद्य** त्रि० कृता अभ्यस्ता विद्या येन। अभ्यस्तविद्ये

**कृतवीर्य्य** पु० कृतं वीर्य्यमनेन। १चन्द्रवंश्ये कार्त्तवीर्य्यार्ज्जुनजनके नृपभेदे। “कनकस्य तु दायादास्चत्वारो लोकविश्रुताः। कृतवीर्य्यः कृतौजाश्च कृतवर्म्मा तथैव च। कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्य्यादथार्ज्जुनः” हरिवं०